International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(2): 87-89
© 2024 IJSR
www.anantaajournal.com
Received: 22-01-2024
Accepted: 25-02-2024

**मोहित चन्द्र परगाई**
शोधच्छात्रः,
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरुपतिः, आंध्र प्रदेश, भारत

# अथर्ववेदे ओंकारस्य महिमा

**मोहित चन्द्र परगाई**

**प्रस्तावना**

वैदिकवाङ्मये सनातनसंस्कृतौ च ओंकारस्य कीयान् महत्त्वं वर्तते इति सर्वे जानन्त्येव । यतोहि सर्वत्र यज्ञ, दान, तपः, पूजा क्रियादयः ओंकार पूर्वकमेव प्रवर्तन्ते। उक्तं च गीतायामपि भगवता –

ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुराः।।
तस्मादोमित्युदाहृत्य यज्ञदानतपः क्रियाः।
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ।।[1]

पुनश्च उक्तं यदेतदोंकारं मरणसमये अनुस्मरन् म्रियते सः परमगतिं प्राप्नोतीति-

अन्त काले च मामेव स्मरन्मुक्त्वा कलेवरम्।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः।।[2]

**विषयः**

तदिदं मया अथर्ववेदग्रन्थेषु ओंकारस्य विषयकचर्चा तस्य माहात्म्यं यथाशक्ति निरूप्यते। अथर्वसंहितायां नवमकाण्डे दशमसूक्ते विशेषतः ओंकारस्य प्रस्तावः। तत्र ओंकारस्य महिमा वर्णयन् कथयति ऋषिः –

ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदः।
यस्तन्न वेद किमृचा करिष्यति य इत् तद् विदुस्ते अमी समासते।।[3]

---

[1] श्रीमद्भगवत् गीता १७.२३,२४

[2] श्रीमद्भगवत् गीता ०८.०५

[3] अथर्व० ९.१०.१८

Corresponding Author:
**मोहित चन्द्र परगाई**
शोधच्छात्रः,
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः,
तिरुपतिः, आंध्र प्रदेश, भारत

**पदपाठः**

ऋचः ।अक्षरे ।परमे ।विऽओमन् ।यस्मिन् ।देवाः ।अधि ।विश्वे ।निऽसेदुः ।।

यः ।तत् ।न ।वेद ।किम् ।ऋचा ।करिष्यति ।ये ।इत् ।तत् ।विदुः ।ते ।अमी इति ।सम् ।आसते ।।

अन्वयः- ऋचः अक्षरे परमे व्योमन् यस्मिन् विश्वेदेवाः अधि निषेदुः यः तं न वेद ऋचा किं करिष्यति ? यः इत् विदुः ते अमी समासते ।।

व्याख्या- ऋचः अक्षरे –क्षररहित ऋग्रूप अस्मिन् अक्षरे, परमेव्योमन् – श्रेष्ठतम व्योमनि आकाशे, यस्मिन् विश्वेदेवाः – सर्वेदेवाः, अधि निषेदुः –अधिवसन्ति ।यः- व्यक्तिः, तं न विदुः – एतत् न जानाति, सः ऋचा – वेदं पठित्वा, किं करिष्यति – किं कर्तुं शक्यते(तस्य अध्ययनं व्यर्थमेव) ।यः तद्विदुः – यः व्यक्तिः एतदक्षरं सम्यक् जानाति,ते अमीसमासते – सः अक्षरब्रह्मं प्राप्नोति।

अथर्ववेदीय गोपथब्राह्मणे ऋषिणा उक्तं - सृष्टिकर्ता ब्रह्मा ओंकारेणैव सर्वान् असृजत इति ।

यदयं एकमक्षरम् एतावता महिमा संम्पन्नः तर्हि अस्य स्वरूपं सुषष्टतया ज्ञातव्यम्। ओंकारविषयकं चर्चामारभते यथा "ब्रह्म ह वै ब्रह्माणं पुष्करे ससृजे"[4] इति। सृष्टयादौ सृष्टिकर्ता ब्रह्मा चिन्तामापन्नः यदहम् एकेन अक्षरेण सर्वं सृष्टिकार्यं कर्तुं शक्नुवमिति। तदा सः ओम् इति एकाक्षरमपश्यत्। तेन "सर्वांश्च कामान् सर्वांश्च लोकान् सर्वांश्च देवान् सर्वांश्च वेदान् सर्वांश्च यज्ञान् सर्वांश्च शब्दान् सर्वांश्च व्युष्टीः सर्वाणि च भूतानि स्थावरजङ्गमान्यनुभवेयमिति स ब्रह्मचर्य्यमचरत् ।स ओमित्येतदक्षरमपश्यद् द्विवर्णञ्चतुर्मात्र सर्वव्यापि सर्वविभ्वयातयामब्रह्म ब्राह्मीं व्याहतिं ब्रह्मदैवतं तया सर्वांश्च कामान् सर्वांश्च लोकान् सर्वांश्च देवान् सर्वांश्च वेदान् सर्वांश्च यज्ञान् सर्वांश्च शब्दान् सर्वांश्च व्युष्टीः सर्वाणि च भूतानि स्थावरजङ्गमान्यन्वभवत्तस्य प्रथमेन वर्णेनापस्नेहश्चान्वभवत्तस्य द्वितीयेन वर्णेन तेजो ज्योतींष्यन्वभवत्"[5] इति ।

तस्य प्रथमया स्वरमात्रया पृथिवीम्, अग्निम्, ओषधिवनस्पतीन्, भूरिति व्याहतिः, गायत्रीछन्दात्मकऋग्वेदम्, त्रिवृतं स्तोमम्, प्राची दिशम्, वसन्तर्तुम्, अध्यात्मं वाचम्, रसेन्द्रियजिह्वां च अन्वभवत् ।[6]

तस्य द्वितीयया मात्रया अन्तरिक्षं वायुम्, भुवः इति व्याहृतिः, त्रिष्टुप्छन्दः, पञ्चदशस्तोमात्मकं यजुर्वेदम्, प्रतीचीं दिशम्, ग्रीष्मर्तुम्, अध्यात्मं प्राणम्,अपि च, गन्धघ्राणं नासिकम् इतीन्द्रियम् अन्वभवत् ।[7]

तस्य तृतीयया मात्रया दिवः आदित्यः, स्वरितिव्याहृतिः, जागतच्छन्दः, सप्तदशस्तोमात्मकः सामवेदः, उदीची दिक्, वर्षाऋतुः, अध्यात्मज्योतिः, दर्शनेन्द्रिये चक्षुषी च अन्वभवत् ।[8]

तस्य वकारमात्रया आपः चन्द्रमा, अथर्ववेदः, नक्षत्राणि, जनरिति व्याहृतिम्, अनुष्टुप् छन्दः, एकविंशंस्तोमः, दक्षिणादिक्, शरदृतुः, अध्यात्मं मनः, ज्ञानं ज्ञेयम् इति इन्द्रियाणि च अन्वभवत् (समुत्पादिताः) ।[9]

उपरोक्तानि सर्वाण्यपि वस्तूनि ओङ्कारस्य विभिन्नाभ्यः मन्त्राभ्यः उत्पन्नाः उत वा ओङ्कारेण स्वविभिन्नमात्राभिः एतानि वस्तूनि उत्पादितानीत्यर्थः।

तस्य मकारमात्रया इतिहासपुराणं वाकोवाक्यम्, गाथानाराशंसीः, उपनिषदः, अनुशासनानि, वृधत्, करत्, गुहत्, महत्, तत्, शम् इति व्याहृती: स्वरशम्यनानातन्त्रीः, स्वरनृत्यगीतवादित्राणि, चैत्ररथं दैवतं वैद्युतं ज्योतिः बार्हतं छन्दः तृणवत् त्रयस्त्रिंशौ स्तोमौ ध्रुवाम् ऊर्ध्वां दिशं हेमन्तशिशिरावृतू अध्यात्मं श्रोत्रं शब्दश्रवणमितीन्द्रियाणि अन्वभवत् ।[10]

अत्रोक्ताः पञ्चव्याहृतयः पूर्वं दशमकण्डिकायाम् उल्लिखिताः। यथा सृष्टिप्रकरणे चतुर्वेदानां सृष्ट्यन्तरं सृष्टिकर्ता सर्वा दिशः अन्वैक्षत। तदा "पञ्चवेदान्निरमिमत सर्पवेदम्, पिशाचवेदम्, असुरवेदम्, इतिहासवेदम्, पुराणवेदमिति ।[11] तेभ्यः पञ्चव्याहृतीः निरमिमत "वृधदिति सर्पवेदात्, करदिति पिशाचवेदात्, गुहदिति असुरवेदात्, महदिति इतिहासवेदात्, तदितिपुराणवेदात्" ।[12]

एवं प्रकारेण ब्रह्मा सकलसृष्टिम् अनेन ओंकारेणैव कृतवान् इति श्रूयते। पुनः अग्रे तस्य महिमा उपवर्णयन्ति। यथा- सा एषा एकाक्षरा ऋक् ब्रह्मणः तपसः प्रादुर्भूतः। ब्रह्मवेदस्य वीर्यात्मकः अनेनैव सकलमन्त्राः प्रादुर्बभूवुः। तस्मात् सर्वे मन्त्राः ओंकारपूर्वकमुच्चारयन्ति। अनेन सर्वार्थाः सिध्यन्ति। तदेव उक्तं बाह्मणे "तदेतदक्षरं ब्राह्मणो यं काममिच्छेत् त्रिरात्रोपोषितः

4 गो० ब्रा० १.१.१६

5 गो० ब्रा० १.१.१६

6 गो० ब्रा० १.१.१७

7 गो० ब्रा० १.१.१८

8 गो० ब्रा० १.१.१९

9 गो० ब्रा० १.१.२०

10 गो०ब्रा० १.१.२१

11 गो०ब्रा० १.१.१०

12 गो०ब्रा० १.१.१०

प्राङ्मुखो वाग्यतो बर्हिष्युपविश्य सहस्रकृत्वा आवर्त्तयेत् सिध्यन्त्यस्यार्थाः सर्वकर्माणि चेति ब्राह्मणम्" ।[13]

अस्मिन्नेव प्रकरणे इन्द्रप्राजापत्योः संवादात्मिका आख्यायिकापि वर्तते। एकदा त्रिलोकाधिपतिः इन्द्रः सृष्टिकर्तारं प्रजापतिम् उपयम्य पृष्टवान्। भगवन् ओंकारस्य वैशिष्ट्यं ज्ञातुकामोस्मि। कृपया सविवरं बोधयत इति। तदा ब्रह्मणा ओंकारस्य वैशिष्ट्यं सविवरं कथितोऽस्ति।यथा अवति रक्षार्थे इति आपृ धातुना ओंकारः उत्पन्नः। सर्वमाप्नोति इत्यर्थः। अत्र अवकारौ विकार्यौ तथा वकारस्य संप्रसारणरूप विकारे "इग्यणः संप्रसारणं"[14] अ उ इति जाते द्वयोः गुणे ओकारः पुनः मकार प्रत्ययेन संयोगे ओम् (ॐ) इति सिद्ध्यति। एवं निष्पन्नोंकारस्य सार्द्धचतुर्थीमात्रा इत्याहुः। तस्य ऋग्वेदे स्वरितोदात्तत्वम्। यजुर्वेदे त्रैस्वर्योदात्तत्वम् । सामवेदे दीर्घप्लुतोदात्वम्।अथर्ववेदे ह्रस्वोदात्तत्वम् इत्युक्तम्। एतादृशस्य ओंकारस्य प्रथमा मात्रा ब्रह्मदैवत्या, तां रक्तवर्णात्मिकां यः ध्यायते सः ब्राह्मं पदमाप्नोति। या द्वितीया मात्रा विष्णुदैवत्या, तां कृष्णवर्णेन यः ध्यायते सः वैष्णवपदमाप्नोति। या तृतीयामात्रा तां कपिलवर्णात्मिकाम् ईशानदेवतासम्बन्धिनीं यः ध्यायते सः ऐशानं पदमाप्नोति। अवशिष्ट मकाररूपा अर्द्धचतुर्थीमात्रा या वर्तते सा सर्वदेवतात्मिका, शुद्धस्फटिकसन्निभवर्णेन यः ध्यायते सः अनामकं पदं निर्वाणस्थितिम् अवाप्नोति । एतादृशीमहिमासंपन्नम् ओंकारं यो विप्रो न जानाति तस्य पुनरुपनयनरूपप्रायश्चित्तमपि ब्राह्मणे विहितत्वात् सर्वैर्विप्रैः ओंकारस्य महिमा ब्राह्मणवचनादवगन्तव्यम्। तदेव उक्तं ब्राह्मणे - "लातव्यो गोत्रो ब्रह्मणः पुत्रो गायत्रं छन्दः शुक्लो वर्णः पुंसो वत्सो रुद्रो देवता ओंकारो वेदानाम्"[15] इति ।

अत्र वयं माण्डूक्योपनिषदि उक्तदिशा समन्वयं कर्तुं शक्नुमः। यथा तत्रोक्तं - "ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव। यच्चान्यत्त्रिकालातीतं तदप्योङ्कार एव।[16] सर्वं ह्येतद् ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात् ।[17] इति। एवं प्रकारेण अयं ब्रह्मात्मकः ओंकारस्य सादृश्यं जीवात्मना "अयमात्मा ब्रह्म"[18] इति समन्वेति । यदयम् आत्मा जाग्रत्, स्वप्न, सुषुप्ति एवं तुरीयावस्थामाप्नोति । तम् ओंकाररूपी अक्षरदृष्ट्या मात्रानुसारेण विभाजितुं शक्यते। यथा ओंकारस्य प्रथमामात्रा अकारः सः जागरितस्थानः वैश्वानरात्मकः। तं यः उपासते सः सर्वान् कामान् आप्नोति। या सा द्वितीयामात्रा उकाररूपा स्वप्नस्थानिका तैजसरूपा ।तां यः उपासते सः ब्रह्मविल्कुले (ब्रह्मज्ञानी) भवति। या सा तृतीयामात्रा मकाररूपा (मितेरपीतेर्वामिनोति ह वा इदं सर्वमिति) सुषुप्तस्थानिकः प्राज्ञः यः ध्यायते सः लयस्थानं (ऐशानरूपपदवीम्) आप्नोति। योऽसौ मात्रारहित ओंकारस्तुरीयः वर्तते स तु अव्यवहार्यः प्रपञ्चोपशमः शिवः अद्वैतः एवं यः ध्यायते सः स्वस्वरूपे संविशति अर्थात् निर्वाणरूपां तुरीयावस्थामाप्नोति। एवं प्रकारेण जीवात्मनः ओंकाररूपब्रह्मा सारूप्यं निरूपितम्।

**उपसंहारः**

एवं महिमासम्पन्नं ओङ्कारं सम्यक् विदित्वा तस्य उपासनेन जीवात्मनः लक्ष्यं प्राप्तुं शक्यते इति न संशयः।

**आधारग्रन्थाः**

1. श्रीमद्भगवत् गीता – गीताप्रेस, गोरखपुर
2. अथर्ववेद संहिता – चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली
3. गोपथ ब्राह्मण - चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली
4. पाणिनीय अष्टाध्यायी – संस्कृतभारती, नवदेहली
5. माण्डूक्योपनिषद् - गीताप्रेस, गोरखपुर

[13] गो० ब्रा० १.१.२२

[14] पा०अ० १.१.४५

[15] गो०ब्रा० १.१.२५

[16] माण्डूक्योपनिषद् १

[17] माण्डूक्योपनिषद् २

[18] माण्डूक्योपनिषद् २